CAREERINDIA

# SANSKRIT

**(Second Language)**

**(*Three hours*)**

***Answers to this Paper must be written on the paper provided separately.***

*You will **not** be allowed to write during the first **15** minutes.*

*This time is to be spent in reading the question paper.*

***The time given at the head of this Paper is the time allowed for writing the answers.***

---

*This paper comprises of **two** Sections; **Section A** and **Section B.***

*Attempt **all** the questions from **Section A**.*

*Attempt **four** questions from **Section B**, answering at least **one** question each from the **two** books you have studied and **any two** other questions from the same books you have compulsorily chosen.*

*The intended marks for questions or parts of questions are given in brackets [ ].*

---

## SECTION—A (40 Marks)

*Attempt **all** questions*

**Question 1**

Write a short composition in **Sanskrit** of **150-200** words on any **one** of the following topics :— [15]

अधोलिखितेषु विषयेषु **एकं** विषयम् आधृत्य **150-200** शब्दपरिमितं एकं लघुनिबन्धं **संस्कृतभाषया** लिखत :—

**(i)** शरीरमाद्यं खलु धर्मसाधनम् इत्युक्त्यनुसारं आरोग्यस्य महत्त्वं वर्णयत।

**(ii)** राष्ट्रियोत्सवेषु गणराज्योत्सवस्य आचरणम्।

**(iii)** समूहमाध्यमानां विषयमधिकृत्य निबन्धमेकं लिखत।

**(iv)** संस्कृतं ज्ञानस्य विज्ञानस्य च आकरम् अस्ति इति विषये प्रबन्धं लिखत।

---

**This Paper consists of 7 printed pages and 1 blank page.**



© *Copyright reserved.*

www.careerindia.com

CAREERINDIA

(v) (Picture composition) प्रस्तुतचित्रं आध त्य **संस्कृतभाषया एकं** लघुनिबन्धं लिखत :—



www.careerindia

**Question 2**

Write a letter in **Sanskrit** on any **one** of the following topics :— [7]

अधोलिखितयो: विषययो: **एकं** विषयं आध त्य **संस्कृतभाषया** पत्रं लिखत :—

**(i)** अधिकव ष्टिकारणत: भवत:/भवत्या: प्रदेशे रोगभीति: स जाता। तन्निवारणार्थम् आरोग्याधिकारिणं प्रति पत्रं लिखत।

**(ii)** भवत:/भवत्या: जन्मदिनस्य आह्वानं कृत्वा मित्रं प्रति पत्रं लिखत।

CAREERINDIA

**Question 3**

Read the passage given below and answer in **Sanskrit** the questions that follow, using your own words as far as possible :—

अधोलिखितम् अनुच्छेदं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि यथासंभवं स्वशब्देषु **संस्कृतभाषया** देयानि :—

पुरा प्रकाशवीर: नाम राजा धर्मपुरि राज्ये शासनं करोति स्म। धर्मपुरि राज्यं परित: सान्द्राणि अरण्यानि आसन्। तत्र अनेके वनम गा: वसन्ति स्म। म गयां कर्तुं महाराजस्य महती आसक्तिरासीत्। अत: प्रजा: अपि प्रतिदिनम् अरण्यं गत्वा वनम गान् मारयन्ति स्म। तेन वनम गा: सर्वे व्याकुला: आसन्।

एकदा कश्चन महान् व्याघ्र: तद्वनमागत:। एतेन भीता: जना: राज्ञ: समीपं गत्वा "प्रभो स: व्याघ्र: वनगतानां जनानाम् उपरि आक्रमणं कृत्या मारयति। अत: कृपया व्याघ्रात् अस्मान् रक्षतु" इति निवेदितवन्त:।

परेद्यु: म गयावेषेण महाराज: अरण्यं गत्वा सर्वत्र व्याघ्रस्य अन्वेषणं कृतवान्। 'रात्रौ जलं पातुम् अयं व्याघ्र: नदीम् आगच्छत्येव। तदा तं मारयिष्यामि' इति निश्चित्य समीपस्थं व क्षमेकम् आरुह्य उपाविशत्। कि चित् समयानन्तरं एक: भयंकर: व्याघ्र: नदीसमीपम् आगत:। यदा राजा तं मारयितुम् उद्यत: तदैव व्याघ्र: अवदत् — "हे राजन् ! तिष्ठतु, भवान् किमर्थं मां मारयितुम् उद्यत: अस्ति ? मया क: अपराध: कृत: ?" इति।

महाराज: अकथयत् — 'हे व्याघ्र ! त्वया मम राज्यस्य अनेका: प्रजा: मारिता:। मम प्रजाजना: त्वत्त: भीता: सन्ति। तेषां रक्षणं मम कर्त्तव्यमस्ति। अत: तेषां रक्षणार्थम् अहं त्वां मारयिष्यामि" इति। महाराजस्य वचनं श्रुत्वा व्याघ्र: हसित्वा अवोचत् — महाराज ! यं धर्मं भवान् पालयन्नस्ति तमेव धर्मम् अहमपि पालयन्नस्मि। अहम् अस्य वनस्य अधिप:। वनम गा: मम प्रजा: सन्ति। तेषां रक्षणं मम धर्म:" इति।

व्याघ्रस्य वचनं श्रुत्वा लज्जित: राजा अ जलिं बद्ध्वा — 'हे व्याघ्रमहोदय ! त्वं मम अज्ञानं दूरीकृत्य ज्ञानोदयं कारितवान्। इत:परं वनस्य वनम गाणां च रक्षणमपि अहं करिष्यामि" इति वचनं दत्वा "कृपया मां क्षमस्य" इति उक्तवान्।

(i) कुत: वनम गा: व्याकुला: अभवन् ? [2]

(ii) प्रजा: महाराजस्य समीपं गत्वा किं निवेदितवन्त: ? [2]

(iii) व्याघ्र: हसित्वा राजानं किम् अवोचत् ? [2]

(iv) राजा किं विचिन्त्य व क्षमारुह्य उपाविशत् ? [2]

(v) महाराज: व्याघ्राय किं वचनं दत्तवान् ? [2]

www.careerindia.com

CAREERINDIA

**Question 4**

Answer the following questions according to the instructions given :—

अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत :—

**(i)** वाच्यपरिवर्तनं कुरुत :— [1]

(अ) तेन महाकाव्यं पठ्यते।

(आ) बालिका धावति।

**(ii)** प्रकृति-प्रत्ययविभजनं कृत्वा लिखत :— [1]

(अ) नेतुम्

(आ) वन्दमान

**(iii)** सन्धि-विच्छेदं कुरुत :— [1]

(अ) महर्षि:

(आ) अग्निर्जायते

**(iv)** केवलं समासविग्रहं कुरुत :— [1]

(अ) सीतारामौ

(आ) अनुचितम्।

**(v)** संयोज्य लिखत :— [1]

(अ) द्रुपदस्य अपत्यं स्त्री ............... ।

(आ) अस्ति देव: इति मति: यस्य स: .................... ।

**(vi)** अनुनासिक वर्णान् लिखत। [1]

**(vii)** ल ट् लकारे परिवर्तनं कुरुत :— [1]

(अ) छात्र: विद्यालयं गच्छति।

(आ) गुरु: अज्ञानं परिहरति।

**(viii)** वाक्यदोषान् परिहरत :— [1]

(अ) स्वस्ति प्रजानाम्

(आ) आराध्या आदित्यस्य सह क्रीडति।

www.careerindia.com

CAREERINDIA

**SECTION—B (40 Marks)**

*Questions from only **two** of the following textbooks are to be answered.*

*Attempt **four** questions from this Section.*

*You must answer at least **one** question from each of the **two** books, you have studied and any **two** other questions from the same books that you have chosen.*

## संस्कृतवाणी—भाग-4

### महाकवि: कालिदास:

**Question 5**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

यद्यपि कालिदास: प्रख्यात: तथापि तस्य देशकालादीनां विषये किंचिदपि न ज्ञायते। इदं अस्माकं दौर्भाग्यम्। कालिदास: अस्माकं कवि: इति भारतदेशस्य सर्वेषां जनपदानां जना: वदन्ति। स: भारतदेशे सर्वत्र स चारं कृत्वा उज्जयिन्यां दीर्घकालम् अवसत् इति ऊहा अस्ति।

**(i)** कालिदास: किमिति गौरवं प्राप्तवान् ? किमिति प्रसिद्ध: च। [2]

**(ii)** कालिदास: कस्य न पस्य आस्थाने आसीत् ? तेन सह स्थितानाम् इतर मौक्तिकानां नामानि कानि ? [2]

**(iii)** **पुरा कवीनां गणनाप्रसंगे**

**कनिष्ठिकाधिष्ठित-कालिदास:।**

**अद्यापि तत्तुल्यकवेरभावात्**

**अनामिका सार्थवती बभूव।।**

अस्य श्लोकस्य तात्पर्यं लिखत। [3]

**(iv)** कालिदासस्य कृतिषु के के अंशा: भवन्ति ? [3]

### छात्रशिक्षणम्

**Question 6**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

आत्मसंयमरहितं शिक्षणं शिक्षणं न भवति। या विद्या मानवं दयालुं परोपकारिणं करोति सा एव सद्विद्या। शिक्षणस्य मुख्योद्देश्यं स्वार्थहितचिन्तकस्य संकुचित-मनोभावयुतस्य मानवकुलस्य निर्माणं नास्ति। य: मनुष्य: सम्यक् शिक्षणं ग हीतवान् तस्मिन् स्वत: प्रवर्तितं सानुकम्पं, सर्वेभ्य: जनेभ्य: अवधानं प्रवहति अविरोधेन।

**(i)** किं यथार्थशिक्षणमिति सज्जनानाम् अभिप्राय: ? [2]

**(ii)** शिक्षणस्य लक्षणं किम् ? सम्यक् शिक्षणं छात्रेषु किं जनयति ? [2]

**(iii)** छात्राणां दैनन्दिक-जीवने के के गुणा: वर्धनीया: ? शिक्षणस्य गुरुतरं कार्यं च किम् ? [3]

**(iv)** अधुना कस्या: आवश्यकता अस्ति। तदर्थं कै: प्रयत्न: करणीय: ? [3]

www.careerindia.com

CAREERINDIA

अम तधारा

**Question 7**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

संस्कृतसाहित्ये सुभाषितानां वैशिष्ट्यपूर्णं स्थानं विद्यते। रामायण-महाभारत-पुराण-काव्यादिषु अन्येषु ग्रन्थेषु च तत्र-तत्र सुभाषितानि कविभि: विनिवेशितानि। ईद श-सुभाषितानां प थक् संग्रहो पि तै: कृत:।

**(i)** नर: स्वस्य चरितं कथम् अवेक्षेत ? [2]

**(ii)** **व्याधितस्यार्थहीनस्य देशान्तरगतस्य च।**

**नरस्य शोकदग्धस्य सुहृद्दर्शनमौषधम्।।**

अस्य श्लोकस्य तात्पर्यं लिखत। [2]

**(iii)** कुलीन: शीलगुणान् न त्यजति इति सुभाषिते कथं निरूपितम् ? [3]

**(iv)** वाग्भूषणमेव भूषणमिति श्लोके कथं निरूपितम् अस्ति ? [3]

## संस्कृतवाणी—भाग-5

### प्रार्थना

**Question 8**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानाम् उत्तराणि **संस्कृतभाषया** देयानि :—

अ जनानन्दनं वीरं जानकी शोकनाशनम्।
कपीशम् अक्षहन्तारं वन्दे लङ्काभयङ्करम्।।
अनन्तनामधेयाय सर्वाकारविधायिने।
समस्तमन्त्रवाच्याय, विश्वैकपतये नम:।।

**(i)** वक्रतुण्ड: कीद श: अस्ति ? स: किं करोति ? [2]

**(ii)** **मातापिता गुरु: चैव स्वभावात् त्रितयं हितम्।**

**ग हीत्वा वचनं तेषां, सुखी भवति मानव:।।**

अस्य श्लोकस्य तात्पर्यं लिखत। [2]

**(iii)** इदं सर्वं केन व्याप्तमस्ति ? मा ग ध: कस्यस्वित् धनं कुत: ? [3]

**(iv)** एक: एव देव: स: सर्वेषां साक्षी भवति ? विव णुत। [3]



www.careerindia.com

CAREERINDIA

## परोपकारार्थमिदं शरीरम्

**Question 9**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

पुरा जनसंख्या न्यूना आसीत्। वनानां संख्या अधिका आसीत्। तेषु वनेषु अनेके क्रूरा: म गा: वसन्ति स्म। एकस्मिन् वने एक: लुब्धक: आसीत्। स: म गान् ग हीत्वा तेषां मांसं चर्मादिकं विक्रीय धनार्जनं कुर्वन् आसीत्।

**(i)** परोपकारिणां स्वभावं उदाहरणसहितं विव णुत। [2]

**(ii)** लुब्धक: किमर्थं व क्षम् आरुह्य उपाविशत् ? [2]

**(iii)** परिश्रान्तं लुब्धकं द ष्ट्वा व क: किम् अवदत् ? [3]

**(iv)** व्याधस्य प्रतीक्षायां स्थित: शार्दूल: व कं प्रति किम् अवदत् ? [3]

## अम तवाहिनी

**Question 10**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

सुभाषितं नाम सुष्ठुभाषितम्। संस्कृतवाङ्मयस्य सुभाषितानि सुप्रसिद्धानि सन्ति।

**(i)** क: साक्षात्पशु: ? पशूनां भागधेयं किम् ? [2]

**(ii)** कीद शीं विद्यां कीद शं धनं च अनुपयुक्तम् इति परिगणयन्ति ? [2]

**(iii)** "सन्तोष: एव पुरुषस्य परं निधानम्" श्लोकानुसारं विव णुत। [3]

**(iv)** **मनसि वचसि काये पुण्यपीयूषपूर्णा:**
**त्रिभुवनमुपकारश्रेणिभि: प्रीणयन्त:**
**परगुणपरमाणून् पर्वतीकृत्यनित्यं**
**निजहृदि विकसन्त: सन्ति सन्त: कियन्त:।।** भावार्थं लिखत। [3]

www.careerindia.com